अप्रैल-मई २०१६
(चैत्रः -ज्येष्ठः) वैक्रमाब्दः २०७३

ISSN : 2347-1565
मूल्यम् : २५ रूप्यका

णि

संस्कृत-चन्द्रिका

मासिकी संस्कृत-बाल पत्रिका

वर्षम् ३ • अङ्कः ९-१०



सम्पादकः
डॉ० जीतराम भट्टः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ISSN : 2347-1565

संस्कृत-चन्द्रिका

मासिकी संस्कृत-बाल-पत्रिका

वर्षम् ३
अङ्कः ३/९-१०

अप्रैल-मई
२०१६
(चैत्रः-ज्येष्ठः)

सम्पादकः
डॉ० जीतराम भट्टः

सहायकसम्पादकः
प्रद्युम्नचन्द्रः

अनुक्रमणिका

क्र. सं.			पृष्ठसंख्या
	सम्पादकीयम्		III
१.	होलीखेलनमेवं रम्यम्	डॉ० वेणी माधव शास्त्री	१
२.	संस्कृत वाङ्मये नीत्युपदेशः	अञ्जना शर्मा	३
३.	बालरुचिः	हेमचन्द्र बेलवालः 'हिमांशुः'	८
४.	विचित्राऽनुकृति	आचार्या डॉ. केशवराम शर्मा	९
५.	आदिकाव्यरामायणम्	डॉ. आचार्य रामकिशोर मिश्रः	१४
६.	ज्येष्ठ भ्राता (कथा)	ले सिद्धेश्वर शर्मा	१६
७.	भारती	हेमन्तकुमारजोशी 'शिवः'	१९

दिल्ली संस्कृत अकादमी
(राष्ट्रिय राजधानी क्षेत्रम्, दिल्लीसर्वकारः)
DELHI SANSKRIT ACADEMY
(GOVT. OF N.C.T., DELHI)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकः
सचिवः
दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
प्लॉट सं०-५, झण्डेवालानम्, करोलबागोपनगरम्, नवदेहली-११०००५
दूरभाषः-०११-२३६३५५९२, २३६८१८३५, २३५५५६७६

सदस्यताशुल्कम्
प्रति-अंकम् २५ रूप्यकाणि, $ 2.5
वार्षिकम् २५० रूप्यकाणि, $ 25

© दिल्ली-संस्कृत-अकादमी, दिल्ली-सर्वकारः
© Delhi Sanskrit Academy, Govt. of N.C.T. Delhi

शुल्कप्रदानप्रकारः
बैंकधनादेशः (डी.डी.), डाकधनादेशः (मनिआर्डर) अथवा सी.टी.सी. चैक माध्यमेन
(**सचिव, दिल्लीसंस्कृतअकादमी**पक्षे)

Mode of payment
Demand Draft, Money order or by CTC Cheque
(In favour of Secretary, Delhi Sanskrit Academy)

E-mail ID : delhisanskritacademy@gmail.com
Website : www.sanskritacademy.delhi.gov.in

मुद्रकः
एस.डी.एम. प्रिन्टर एण्ड पैकर
हरिनगरम्, नव देहली-110064
मो. : 9811229529

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्पादकीयम्

बाल्यकाले भाषाशिक्षणस्य क्षमता समधिका भवति। यदि बाल्यावस्थायामेव संस्कृतं पठितुं व्यवस्था भवेत् तर्हि संस्कृतं प्रति छात्राणां मनःसु व्यापृता मिथ्याधारणा नंक्ष्यति। वस्तुतः भाषाव्यवहारस्य विषयः। पञ्चमीकक्षापर्यन्तं छात्राः संस्कृतं नहि पठन्ति। अतः तेषां मनःसु भावना भवति यत्संस्कृतं कठिनमस्ति। वस्तुतः प्राथमिककक्षासु पठितानां भाषाणामपेक्षा ते संस्कृतं कठिनं वदन्ति। तत्र संस्कृत-शिक्षणस्यारुचिकरा पद्धतिरपि कारणभूताऽस्ति। अतः शैशवे बाल्यकाले च संस्कृतं पठितुं संस्कृतं सम्भाषितुं च छात्राः प्रेरणीयाः। बालानां कृते पाठ्यक्रमेतरसामग्री संस्कृते नैवोपलभ्यते। संस्कृते बालपत्रिकाणामभावो दृश्यते। यदि कुत्रचित्प्रकाश्यन्तेऽपि विद्यालयेषु बाल-संस्कृतपत्रिकाणां प्रसारो न भवति। अवकाशदिनेषु कार्यशालाः शिबिराणि च प्रचलन्ति, किन्तु संस्कृतशिक्षणशिबिराणां संख्या न्यूना भवति। यदि संस्कृत-शिक्षकाः विद्वांसो विदुष्यश्चास्मिन् विषये सन्नद्धाः भवेयुः परस्परं मिलित्वा विभिन्नेषु क्षेत्रेषु शिबिराणि संचालयेयुः तर्ह्यवश्यं बालेषु संस्कृतं पठनाय रुचिर्जागृता भविष्यति।

सुमनसां प्रतिभाप्रतिभासिका
क्षितितलात्तमसश्च विनाशिका।
शिशुकिशोरयुवप्रियसाधिका
विजयते भुवि संस्कृत-चन्द्रिका॥

निवेदकः

डॉ. जीतरामभट्टः

सचिवः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

होलीखेलनमेवं रम्यम्

आयाति च मधुमासोत्सवः
याति च मन्दं शिशिरोत्सवः
उत्सवराजो होल्युत्सवः
वर्णमयोऽयं हर्षोत्सवः ॥1॥

उच्चैर्नदति च कर्कशवाद्यं
अजिनस्य च तत् सततं वाद्यम्।
उच्चैर्घोषणकरणं चाद्यं
मित्रैः साकं भ्रमणं माद्यम्॥ ॥2॥

संगीतस्य च रागो नास्ति
शास्त्रीयस्य च भागो नास्ति
यद्वा तद्वा घोषणमस्ति
स्वच्छन्दस्य च पोषणमस्ति॥ ॥3॥

वर्णमयानि जलानि पतन्ति
वर्णमयाश्चूर्णाः प्रपतन्ति।
कामस्य च पूजाः प्रचलन्ति
चेतांसि च रागैर्विचलन्ति ॥4॥

वसने पीतो वर्णरसोऽयं
पतति च शोणो वर्णरसोऽयं।
बहुवर्णानां पतिताश्चूर्णाः
देशविभागा वर्णैः पूर्णाः ॥5॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खेदानां परिवर्तनकालः
गीतानां स तु गायनकालः।
यूनां तत्र च नर्तनकालः
सर्वेषां संतोषकालः।। ।।6।।

उत्सवसौख्यं निर्गतसाम्यं
होलीखेलनमेवं रम्यम्।
बालैर्युवकैः सर्वैः काम्यं
परमसुखं यत् तस्य च गम्यम्।। ।।7।।

– डॉ० वेणी माधव शास्त्री
भामती बेन्द्रे मार्ग, साधनकेरी,
धारवाड़, कर्णाटक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतवाङ्मये नीत्युपदेशः

(क) नीति- नीयन्ते प्राप्यन्ते संलभ्यन्ते उपायादयः लौकिकाः पारलौकिका वा अर्था अनया अस्यां वा इति नीतिः। प्रापणार्थकान्नी धातोः करणे अधिकरणे चार्थे क्तिन्-प्रत्यये नीतिशब्दो निष्पद्यते। अतो नीति शब्दस्य व्यापकेऽर्थे ऐहिकानामामुष्मिकाणाञ्च समेषामुपायानां समस्तानि साधनानि समायान्ति। अत एव नीतिशब्दस्य विविधेष्वर्थेषु प्रयोगः प्राप्यते।

मुख्यतः नीतेः वर्गद्वयं स्वीक्रियते- 1. राजनीतिः, 2. धर्मनीतिश्च राजनीतेरेव अपरं नाम दण्डनीतिः, यत्र साम-दाम - भेद-दण्ड रूपाणामुपायानाम् अन्येषाञ्च लौकिक-व्यवहाराणां विधानस्य वचनानि निर्दिश्यन्ते। अर्थ-कामरूपस्य पुरुषार्थद्वयस्य विधिरत्र प्रदर्श्यते। धर्म-मोक्षरूपस्य पुरुषार्थद्वयस्य च विषये वचनानि धर्मनीतौ निर्दिश्यन्ते।

(ख) उपदेशः- उपपूर्वकात् अतिसर्जनार्थक दिश् धातोः भावे घञि निष्पन्नस्य उपदेश शब्दस्य शिक्षणम्, मन्त्रकथनम्, हितकथनम्, परामर्शदानम् व्यावहारिकशिक्षेत्यादि, विविधाः अर्था भवन्ति।

काव्यस्य विविधेषु प्रयोजनेषु कान्तासम्मितोपदेश एव मुख्यं प्रयोजनं विद्यते। संस्कृत-कवय आदिकालादेव मनोरञ्जनेन सह शिक्षणस्य, हृदयावर्जनेन सह तत्त्वबोधस्य च अद्वितीयं साधनं काव्यं मन्यमानाः उपदेशात्मकं काव्यं विरचयन्तो दरीदृश्यन्ते। ते च क्वचित् स्वभावोक्त्या क्वचिच्च वक्रोक्त्या हि वचनं समुपदिशन्ति। क्वचित् प्रत्यक्षरूपेण क्वचिच्च परोक्षरूपेणा शिक्षयन्ति। अस्मिन् उपदेशात्मके काव्ये नीतिरपि प्रतिपादनं भवत्येव। तत्र नीतेः प्रत्यक्षतः प्रतिपादनं यत्र भवति तत् उपदेशात्मकं नीतिकाव्यं प्रथम-नीतिवर्गे आगच्छति। यत्र परोक्षरूपेण कर्तव्याकर्तव्य- विषयकं हितम् कमनीयकाव्यद्वारा निर्दिश्यते तत् उपदेशात्मकं काव्यं द्वितीये उपदेशवर्गे आगच्छति। यद्यपि अनेकत्र एवं एवं विधायाः विभाजक-रेखाया अङ्कनं कठिनं भवति तथापि साधारणतया वर्गद्वये पूर्वोक्तरीत्या विभाजनं क्रियते।

(क) नीतिकाव्यम्- यत्र काव्ये स्वच्छाचरणस्य, आदर्शचरित्रस्य, जीवन-समाजोपयोगिकर्तव्याकर्तव्य-निर्देशकस्य च हितवचनं प्रतिपाद्यते तन्नीत-काव्यम्। भारतीयाः मनीषिणः स्वानुभवमाधारीकृत्य जनानां कृते शान्तिमयं सुखमयं भव्यं जीवनं यापयितुं समुचितमार्ग निरदिशन् अद्यापि च निर्दिशन्ति। ते मानव-प्रकृतेः दुर्बलतां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विज्ञाय तां दुर्बलतां विजेतुं जीवनस्य जटिल-परिस्थितौ धैर्यपूर्वकं सदाचार-परिपालनाय महत्त्वपूर्णं सत्यं शिवं सुन्दरञ्च निर्देशमकुर्वन्। भारतीय-चिन्तकानां दृढोऽयं विश्वासः यत् मानवस्य वर्तमानजीवनं तस्य पूर्वार्जितशुभाशुभकर्मणः फलम् तथा वर्तमानमपि कर्म तस्य भावि जन्मनो निर्माणे असाधारणं कारणं भविष्यति। अत्श्च भावि जीवने शुभफलमवाप्तुं वर्तमानजीवने नीतिपूर्वकं सदाचरणं परमावश्यकम् यथामधुरफलमास्वादयितुं तत्फलदायकतरोरेव रोपणमावश्यकं भवति। एतदर्थमेव सदाचरणाय नीतिशास्त्रं प्रादुरभूत्। तत्र क्वचित् प्रभुसम्मितवाक्येन क्वचिच्च कान्तासम्मितवाक्येन नीतिवचनानि निर्दिष्टानि, समुपदिष्टानि च सन्ति। तान्येव वचनानि सूक्ति-सदुक्ति-लोकोक्ति-छन्दोबद्धनीति-वाक्यानि विविधानि रूपाणि परिगृह्य विकसितानि।

एतेषु कानिचन नीति-वाक्यानि व्यवहार-कोविदानां कण्ठेषु सुरक्षितानि आसन्, यानि मानव-जीवनस्य उत्कर्षापकर्षप्रसङ्गे प्रकटितानि अभूवन्। कानिचित् रामायण-महाभारत-पुराणमन्वादि स्मृतिग्रन्थेषु महर्षिभिः प्रतिपादितानि। कतिपयानि नीति-वचनानि कविभिः स्वतन्त्ररूपेण विरचितानि। दशम शताब्दीं यावत् नीति-वचनानां विकासस्य इयमेव स्थितिरासीत्। पश्चात् पूर्वस्मिन् काले प्रतिपादितानां नीति-वाक्यानां संकलनं विधाय तेषां विविधाः संग्रहाः विद्वद्भिर्विहिताः। संग्रहात्मकमिदं कार्यमतीव महत्त्वपूर्णमभूत्, यतः अनेकेषाम् नीतिवचनानामध्ययन-पूर्वकं यतस्ततः संकलनमतीव दुष्करमासीत्। महता परिश्रमेण साध्यमिदं संकलनात्मकं कार्यं यत् तदानीं प्रादुरभवत् तदग्रेऽपि प्रवर्धमानमभूत्।

दशम शताब्द्याः परं संग्रहात्मककार्येण सह एतस्मिन् क्षेत्रे स्वतन्त्रग्रन्थलेखनकार्यमपि न कदापि अवरुद्धमभूत्। अनेके नीत्युपदेशात्मकग्रन्थाः कवि-कोविदैर्नीतिनिपुणैर्विरचिताः। नीत्युपदेशद्वारा समाजे सदाचार-शिक्षणमित्येव एतद्रचनाया मुख्यं प्रयोजनमासीत्।

नीत्युपदेशात्मक-ग्रन्थानां रचनासु कविभिः विविधाः शैल्यः अनुसृताः। क्वचिद् दम्पत्योः परस्परसम्वादे नीत्युपदेशाः वर्णिताः सन्ति, यथा रामचन्द्रगामिनः सिद्धान्तसुधातटिन्याम्, क्वचिद् दम्पत्योः परस्परसम्वादे नीत्युपदेशाः वर्णिताः सन्ति, क्वचिद् द्वयोः प्रेमासक्तयोः परस्परालापे, यथा, चोरकवेः विद्यासुन्दरे, रम्भाशुकसम्वादे च, क्वचिद् युवत्या सह परिव्राजकस्य वार्तालापे, यथा मदनमुखचपेटिकायाम्, कुत्रचित् द्वयोः पश्वोः सम्वादे, यथा घटखर्परस्य नीतिसारे सिंहशूकरयोः सम्वादे, क्वचिच्च पार्वतीपरमेश्वरयोः परिसम्वादे नीत्युपदेशात्मिका रचना विलसन्ति। उपर्युक्ताभ्यः शैलीभ्यो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भिन्नायामपि अन्योक्तिरूपायां प्रहेलिकारूपायाञ्च पद्धत्याम् नीत्युपदेशात्मकं वर्णनं समुपलभ्यते।

अतिप्राचीनकालादेव इयमुक्तिः प्रचलितास्ति यत् ''परोक्षप्रिया हि देवाः प्रत्यक्षद्विषः''। परोक्षरूपेण वर्णनं देवानामपि प्रियङ्करं भवति। कस्यापि विषयस्य प्रत्यक्षतः अभिधया प्रतिपादनात् तस्य परोक्षरूपेण व्यञ्जनया प्रतिपादनं कमपि अपूर्वं विशिष्टं चमत्कारमादधतीति अनुभवन्ति भावुका विपश्चितः। अतएव आनन्दवर्धनाभिनवगुप्त-मम्मटादयः काव्ये-प्रतीयमानमर्थं सर्वातिशयिरूपं मन्यन्ते। सहृदयाश्च तथैवानुमोदन्ते। एवमेव नीत्युपदेशो यत्रान्योक्तिसरण्या, प्रहेलिका-पद्धत्या वा प्रतिपाद्यते तत्र नीत्युपदेशात्मकः सोऽर्थः स्वप्रयोजनसिद्धौ अधिकं साफल्यं भजते। अतएव अनेके कवयः एतया पद्धत्या स्वाभीष्टं प्रतिपादयन्ति। पण्डितराजजगन्नाथस्य अन्योक्तेः प्रभावो विद्वद्भिरनुभूयते एव।

अन्योक्तिसरण्या नीत्युपदेशात्मकर्णने-एकनाथ-काश्यपि-गणपतिशास्त्रि-गीर्वाणेन्द्र-घनश्याम-जगन्नाथप्रभृतीनाम् अन्यापदेशशतकानि, आच्चानदीक्षित लक्ष्मीनृसिंहादीनाम् अन्योक्तिमाला, हरिकृष्ण-प्रणीतः अन्योक्तिसहाध्यायः, भट्टवीरदर्शन विजयमणिसोमनाथादि विरचितानि अनादि अन्योक्तिशतकानि, अज्ञातनामककविकृता अन्यान्यदेशपद्धतिः एवं विधा अनेका अन्याश्च रचनाः नीत्युपदेशं विदधति। इतो भिन्नानामपि कृतीनां सूचना लुडविक स्टर्नबाख महोदयेन महासुभाषितसंग्रहग्रन्थस्य भूमिकायां प्रदत्ता, यत्र कविमयूरकृतं-मयूराष्टकम्, पुरुषोत्तमविरचिता विष्णुभक्तिकल्पलता, उत्प्रेक्षवल्लभ-शिवदास प्रणीतम् चत्वारिंशत् पद्धत्यात्मकम् भिक्षाटनकाव्यञ्चात्र उल्लेखनीयतां भजन्ते।

प्रहेलिकारूपायां पद्धत्यामपि नीत्युपदेशात्मककृतीनां संख्या अनल्पा विद्यते। यद्यपि संस्कृत-काव्यशास्त्रे प्रहेलिकारूपं काव्यं रसानुभूतौ बाधकं सत् अधमायते, प्रहेलिकारूपोऽलंकारश्चापि रसस्य परिपन्थित्वान्नालंकारकोटौ परिगण्यते, तथापि विवेचन-विचक्षणैः समालाचकैः नीत्युपदेशात्मक काव्यकोटौ प्रहेलिका सादरं स्वीक्रियते, यतोहि एतया सरण्या प्रतिपादितो नीत्युपदेशः कमपि चमत्कारमादधाति। अतएव चतुष्षष्टि-रूपासु कलासु प्रहेलिकापि अन्यतमत्वेन परिगृह्यते।

धर्मदासः स्वकीये ''विदग्ध मुखमण्डने'' निम्नलिखितप्रकारेण प्रहेलिकां परिभाषते-

"व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्।
यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका॥"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अत्र प्रतिपाद्यमानर्थंविधाय कोऽप्यन्योऽर्थः प्रतिपाद्यते। आर्थीशाब्दीति भेदेन एषा द्विविधा। दण्डिना काव्यादर्शे एतस्या अनेके भेद-प्रभेदाः प्रदर्शिताः।

वस्तुतो वैदिक वाङ्मयेऽपि ब्रह्मविषये अध्यात्मविषये च रहस्यात्मकं कूटात्मकञ्च वर्णनं, बलोद्याः कथाश्च प्राचुर्येण उपलभ्यन्ते। ऋग्वेदे, यजुर्वेदे, अथर्ववेदे, ऐतरेय कौषितकि-तैत्तिरीय-शतपथ-ब्राह्मणेषु, बृहदारण्यकोपनिषदि, आपस्तम्बाश्वलायन-कात्यायन-लाट्यायन-सांख्यायन-वैतानसूत्रेषु च रहस्यात्मकः कूटात्मकश्च उपदेशः उपलभ्यते। रामायण-महाभारतादौ, बौद्ध-जैन-साहित्ये च उपदेशात्मकानि वचनानि प्राप्यन्ते। सुभाषितसंग्रहेषु अनेके कूटात्मका उपदेशाः संग्रहीताः सन्ति।

प्रहेलिकानामनेकानि संकलनानि मिलन्ति येषु धर्मदासस्य विदग्धमुखमण्डनम् अतीव प्रसिद्धम्। एतस्य अनेकानि पद्यानि शार्ङ्गधरपद्धतौ जल्हणस्य सूक्तिमुक्तावल्याञ्च संगृहीतानि सन्ति।

आलापान्तरालापरूपेण विरचिता प्रहेलिका विदग्धमुखमण्डनकारस्य धर्मदासस्य कवि-कर्म-कौशलं निर्दिशति। चतुर्षु अध्यायेषु विभक्तं विंशत्यधिक-शतद्वय-श्लोकात्मकं विदग्धमुखमण्डनम् वस्तुतः अन्वर्थनामकं विद्यते।

प्रहेलिकात्मकरचनासु नागराजस्य भावशतकम् अज्ञातकर्तृकम् समस्यादीपकम् अज्ञात कर्तृकमेव सीताविनोदकाव्यम्, कविकाशीनाथविरचितः "दृष्टकूटार्णवः", हिमकर शर्मणा लिखितम् "संसर-विहारकाव्यम्", प्रहेलिकापद्धति कूटाख्यानञ्च," लक्ष्मीनारायणेन प्रणीता समस्या पूर्तिः एवंविधानि अन्यानि च उपदेशात्मकप्रहेलिकारूपाणि काव्यानि कवि-कर्म-कौशल-निदर्शनानि विद्यन्तेतराम्।

सूचीकटाहन्यायेन अन्योक्ति-प्रहेलिकारूपस्य नीत्युपदेशात्मककाव्यस्य उपर्युक्तमेतद् विवरणम्। नीत्युपदेशात्मकानि काव्यानि यानि मुख्यधारायां विलसन्ति तेषां विवरणमितः परं प्रस्तूयते।

"धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्॥"

इति महाभारतीय वचनेन विज्ञायते यत् धर्मार्थकाममोक्षविषयानधिकृत्य यत् किमपि निरूपणीयं तत् सर्वं महाभारते निरूपितं वर्तते। अतः च मानव-जीवनोपयोगि नीत्युपदेशात्मकं वचनमपि तत्र प्राचुर्येण समुल्लिखितं वर्तते। नीतिवचनानां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खनि-स्वरूपादस्मादेव महाभारतात् समुद्भूता अतिप्रसिद्धा विदुरनीतिः, या प्रज्ञावादान् प्रभाषते, लोकप्रियतां जीवनोपयोगिताञ्च समादधाति।

षडेव तु गुणाः पुंसा न हातव्याः कदाचन। सत्यं दानमनालस्यमनसूया क्षमा धृतिः।।

इत्यस्मिन्नुपदेशात्मके वचने निहिता नीतिरपि सम्यक् प्रकाशते। एवमेव रामायण-पुराणादौ, स्मृति-ग्रन्थेषु, बौद्ध-जैन-साहित्ये च नीत्युपदेशात्मकानि वचनानि प्रतिपादितानि सन्ति, यानि पूर्वमेव चर्चितानि।

परस्तात् चन्द्रगुप्तमौर्य-राज्य-संस्थापकस्य कौटिल्यापरनामधेयस्य चाणक्यस्य सारगर्भितानि कालजयीनि सूत्ररूपाणि पद्यरूपाणि च नीत्युपदेशवचनानि समाजस्य सम्मुखमागतानि। यद्यपि चाणक्यनीति-दर्पणे महाभारत-पुराण-मन्वादिस्मृति-ग्रन्थानामपि कतिपयानि वचनानि दृश्यन्ते तथापि बाहुल्येन चाणक्येन प्रणीतत्वात् प्रधानव्यपदेशन्यायेन चाणक्यनीतेरेव तानि वचनानि व्यपदिश्यन्ते। यानि नीत्युपदेशवाक्यानि तेन सूत्ररूपेण प्रतिपादितानि तानि चाणक्य-सूत्राणि निगद्यन्ते।

महतः कालस्यान्तराले विशालेऽस्मिन् देशे चाणक्य-नीतिवचनानि कानिश्चित् प्रकाशितानि, कानिचित् पाण्डुलिपिषु सुरक्षितानि। यानि च जन-कण्टेषु रक्षितानि तानि समये समये लिपिबद्धानि भवन्त्यपि विभिन्नरूपतां गतानि।

वर्तमानशताब्द्याः प्रारम्भे क्रेस्लरमहाशयः चाणक्यनीति-वचनेषु गवेषणं विधाय शोधनिबन्धं च प्रस्तूय विपश्चितां ध्यानमाकर्षत्। अयं हि सप्तदश हस्तलेखान् समधीत्य तदाधारेण प्रामाणिकं संस्करणमपि प्रस्तोतुं प्रयासमकरोत्।

- शोधार्थी
अञ्जना शर्मा (ज्योतिष विभागः)
जगद्गुरूरामानन्दाचार्य राजस्थान
संस्कृत विश्वविद्यालय,
जयपुरम्

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बालरुचिः

जननी कथयति पठ पठ पुत्र!
जनकः कथयति पठ पठ पुत्र!
भगिनी कथयति पठ पठ भ्रातः!
कोऽपि न कथयति खेल खेल।।

खेलं खेलितुमहमिच्छामि
प्रातः सायं, दिवसे रात्रौ
परं कदापि न कोऽपि ब्रूते
कुरु खेलं सततं बाल त्वम्।।

ईश्वरपूजा गुरुजनसेवा
मातुर्वचनानुगमनमादि।
कार्यं बहु मम, दिने समस्ते
बहुधा श्रान्तो भवामि तेन।

भारतवन्दनमहमिह कुर्वे
यतोहि देशो मम वन्द्योऽयम्।
सरस्वतीमपि सततं वन्दे
यतोहि सा मम विद्यादेवी।।

मम रुचिरधिका खेलितुमस्ति
कठिनं पठितुं न हि शक्नोमि।
कथयतु मम मातरमागत्य
प्रेषय खेलितुमेतं बालम्।।

- हेमचन्द्र बेलवालः 'हिमांशुः'
सहायक अध्यापक संस्कृत
रा० उ० मा० वि० घसाड
पो० विनायक मुवानी
जिला-पिथौरागढ़, उ०ख०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विचित्राऽनुकृतिः

रामानन्द एकः प्रतिष्ठित्रेनुकर्ताऽस्ति। स यथावसरं थानाध्यक्षस्य, राजपुरुषस्य, हनुमतः, श्रेष्ठिनः, संन्यासिनो भिक्षुकस्य, यस्य कस्यापि रूपधारणङ्करोति। तस्य वेशभूषा मुखाकृतिः संवादाः हस्तपादादीनां सङ्केताश्चेदृशाः भवन्ति, यत् यावत् स स्वयमेव आत्मनो रहस्यं नोद्घाटयति, तावत् कोऽपि तस्योपरि शङ्कां न करोति।

रामानन्दो मनुष्याणां पक्षीणां पशूनाञ्च कण्ठध्वनीः स्वकण्ठात् तथा निष्कासयति, यत् सर्वे जनाः मन्त्रमुग्धा इव हर्षिताः भवन्ति। कल्पितस्वरूपे स कस्याप्यहितं न करोति। विभीषिताय जनाय स शीघ्रमेव विनम्रभावेन क्षमायाचनापूर्वकं स्वपरिचयं ददाति, स्वकलायाः पारितोषिकञ्च याचते। वंशपरम्परातः समागतः तस्यायं व्यवसायो जनानां मनोरञ्जनं करोति। स राजकीयप्रमाणपत्रमपि धारयति, यदापत्तिकाले तस्य रक्षणं करोति। विविधोत्सवेषु अवसरानुकूलेन रूपेण तस्यागमनं भवति।

आषाढशुक्लनवम्यां तेन चिन्तितं यत् अस्मिंश्चतुर्मासे स दण्डिस्वामिनः रूपं धारयिष्यिति। सर्वां व्यवस्थां कृत्वा स द्वितीये दिवसे प्रातः काल एव नगर-श्रेष्ठिनो गिरिधारिलालस्य गृहं गच्छति। श्रद्धानतः श्रेष्ठी तस्य पादयोः पतति, पृच्छति च तस्य मनोरथम्।

रामानन्दः- अहमस्मिन्वर्षे गङ्गातटे कुत्रापि पवित्रस्थले स्व चतुर्मासानुष्ठानं कर्तुमिच्छामि। भवतो निवासस्थलं ममानुकूलं प्रतीयते। यदि भवान् सपरिवारमेतदर्थं व्यवस्थां कर्तुमुद्यतो भवति, तर्हि अहमत्रैव इदमनुष्ठानं करिष्यामि।

गिरिधारिलालः- अस्माकं परमसौभाग्यमस्ति। वयं सर्वे इच्छामो यद् भवानस्माकं गृहं पूतं कर्तुं प्रसीदतु।

रामानन्दः- अहं भवतां सर्वेषां निर्णयं ज्ञात्वैव स्वनिर्णयं करिष्यामि। चतुर्मासानामवधिः सुदीर्घा भवति। आपद्ग्रस्ता अपि वयं स्थानपरिवर्तनं कर्तुमसमर्थाः भवामः। कृपया पृच्छतु भवान् स्व परिवारजनानपि।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गिरिधारिलालः- भवानस्य आसनस्य शोभावृद्धिं करोतु। अहं शीघ्रमेव सपरिवारमागच्छामि।

रामानन्द आसनमधितिष्ठति। श्रेष्ठी अन्तर्गृहं गत्वा शीघ्रमेव सपरिवारमागच्छति। सर्वे दण्डिस्वामिनं नत्वा तस्याग्रे तिष्ठन्ति।

गिरिधारिलालः- एषास्ति मे धर्मपत्नी 'रमादेवी' एषः मम पुत्रो 'राकेश' इयञ्चास्य धर्मपत्नी 'रश्मिदेवी'। एष एवास्ति अस्माकं परिवारः। वयं सर्वे भवतः सेवां कर्तुमिच्छामः।

सर्वे सहर्षं पुनरभिवादनं कुर्वन्ति।

रामानन्दः- अहमतीवप्रसन्नो ऽस्मि। वयं दण्डिस्वामिनः सदैव मध्याह्नकाल एव भोजनं कुर्मः। कश्चिद् यज्ञोपवीतधारी ब्राह्मण एव शुद्धिपूर्वकं पृथक्पाकशालायां तस्य पाकं करिष्यति।

राकेशः- अस्माकं पारिवारिकपण्डितः श्यामसुन्दर शर्मा सर्वां व्यवस्थां करिष्यति। अहं दूरभाषद्वारा इदानीमेव तस्यावाहनं करोमि।

रामानन्दः- श्रेष्ठिना सह गत्वा सर्वं भवनमुद्यानं गङ्गातटञ्च पश्यति। उद्यानं निकषा स एकं विशालं कक्षं चिनोति। श्रेष्ठिन आदेशात् तस्य शुद्धिर्भवति। तावद् रामानन्दो गङ्गास्नानं करोति। पुनरागत्य स ईशानकोणे काष्ठपट्टिकोपरि स्वदण्डं स्थापयति। तस्य पार्श्वे स्वगुरुदेवस्य, आदिशङ्कराचार्यमहोयस्य, भगवतः शङ्करस्य च मूर्तिं यथास्थानं स्थापयति। तत्रैव घृतधूपदीपादीनां व्यवस्था भवति। तस्य पुरतः स्वामिनः पूजासनं पार्श्व एव च भूमौ एव तस्य शयनव्यवस्था भवति।

इदानीमेव पण्डितः श्यामसुन्दरशर्मा आगच्छति। स सहर्षं दण्डिस्वामिनः सेवां कर्तुमुद्यतो भवति। पार्श्वकक्षः पाकशालारूपेण परिवर्तितो भवति। रामानन्दः सन्ध्यावन्दनं करोति, तदनन्तरं सामूहिकपूजा भवति। भोगस्वरूपेण कदलीफलानि सेवफलानि नारङ्गफलानि च प्रस्तुतानि सन्ति। यदा भक्ता रूप्यकाणि दातुमैच्छन्, स्वामिना निवारिताः कथितञ्च- ''केनापि रूपेण कोऽपि धनं न दास्यति''। विधानपूर्वकं शङ्खध्वनिना सह भोगकार्यं सम्पन्नं जातम्। प्रसादवितरणानन्तरं रामानन्दोऽपि दुग्धेन सह तस्य ग्रहणं करोति।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वाध्यायरूपेण स शिवपुराणस्यान्यग्रन्थानाञ्चाध्ययनं करोति। द्वादशवादनवेलायां स कमण्डलुं गृहीत्वा पाकशालां गच्छति। तस्मिन्नेव एकवारमेव भिक्षां गृहीत्वा तत्रैव भक्षयति। स्वल्पकालपर्यन्तं विश्रामं कृत्वा स त्रिवादनवेलातः पञ्चवादनपर्यन्तं सत्सङ्गं करोति। तत्र भक्तजनाः कीर्तनं कुर्वन्ति, गानं गायन्ति, तदनन्तरं रामानन्दस्य प्रेरणादायकं भाषणं भवति।

कतिपयदिवसपर्यन्तं तस्मिन् कक्षे सत्सङ्गो भवति। रामानन्दस्य प्रशंसां श्रुत्वा दिने-दिने जनसम्मर्दो वर्धत एव, अत उद्याने तस्य व्यवस्था जाता। स्वभाषणकलयापि रामानन्दोऽतीवलोकप्रियो भवति। बहवो विद्वांसः पण्डितास्साधवश्च तत्र ज्ञानलाभाय आगच्छन्ति। सभायां यत्र-तत्र लिखितमस्ति, यत्कोऽपि जनः धनवस्त्रादीनां समर्पणं न कुर्यात्। सभास्थले विविधफलानां समुच्चयो जायते, तेषां सर्वेषां तत्रैव वितरणं भवति।

सत्सङ्गस्यानन्तरं रामानन्दः केनापि सह सम्भाषणं न करोति। गिरिधारिलालेन पृष्टोऽपि स स्वजीवनस्य विषये योगासनानि च करोति। सन्ध्याकाले गङ्गास्नानं कृत्वा स सायंकालीनसन्ध्यां करोति। स्वकमण्डलुं गृहीत्वा स पाकशालातो भिक्षायां केवलं दुग्धं गृह्णाति। सदा नववादनवेलातः पूर्वमेव स भूमावेव शयनं करोति। प्रातः काले ब्रह्ममुहूर्तादपि पूर्वं स चतुर्वादनवेलायां जागर्ति। शौचादिनित्यकर्माणि कृत्वा रामानन्द उद्याने भ्रमति, योगाभ्यासं करोति, गङ्गास्नानं कृत्वा च प्रातः सन्ध्यां करोति। दुग्ध -फलानाञ्च भिक्षां कृत्वा स स्वाध्यायं करोति। अनेन नित्यक्रमेण स आदर्शजीवनं जीवति।

दण्डिस्वामिनोऽभिनयमात्रेण तस्येट्टशः सम्मानो भविष्यति, दम्भी भूत्वापि तस्येत्थं पूजा भविष्यति, अस्य कल्पनाऽपि तेन कदापि न कृता। विद्वद्ब्राह्मणेभ्यस्तस्य पादस्पर्शो मा भूत्, एतद्विचिन्तयैव तस्यादेशोऽस्ति, यत्कोऽपि जनः तस्य पादस्पर्शं न कुर्यात्। यदा-कदा स चिन्तयति यदस्मिन्वेश एव जीवनस्य सार्थकतास्ति, किन्तु स्व पत्न्या बालकानाञ्च चिन्तनं तस्य निर्बलता भवति। तान् प्रति तस्य महदुत्तरदायित्वमस्ति।

यद्यपि गिरिधारिलालः स्वव्यवसाये स्वल्पमेवावधानं ददाति तथापि ईशकृपया तस्य धनमुत्तरोत्तरं वर्धत एव। प्राप्ते तु कार्तिकमासे गिरिधारिलालश्चिन्तयति यत् दण्डिस्वामिमहोदयस्य अनुष्ठानं देवप्रबोधन्यामेकादश्यां सम्पूर्णं भविष्यति। तदनन्तरमस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दर्शनमपि दुर्लभं भविष्यति। ममातिथ्यं स्वीकृत्यानेन सपरिवारमहमनुगृहीतः कृतः, एतदस्ति मम सौभाग्यम्। अनुष्ठानस्यान्तेऽयं किमपि धनं न गृहीष्यति। इदानीमसौ महाभागो यद्यस्माकमनुग्रहं स्वीकुर्याद् तद् भविष्यति अस्माकं परमसौभाग्यम्।

स्वपरिवारजनेभ्योऽनुमत एकदा श्रेष्ठी एकान्ते परिवारेण सह स्वामिनः सकाशं रत्नालङ्कारैः पूर्णं स्वर्णपात्रं गृहीत्वा गच्छति। निवेदयति च- "भो महात्मन्! कतिपयदिवसेषु भवतोऽनुष्ठानं सम्पूर्णं भविष्यति, तदनन्तरं भवाट्टशानां दर्शनमपि दुर्लभम्।अत एतत् स्वल्पोपायनं स्वीकृत्य अस्मान् कृतार्थान् कुरु।" सर्वे साष्टाङ्गं नमन्ति।

रामानन्दस्तिर्यग्दृष्ट्या तत्प्रकाशपुञ्जं पश्यति, चिन्तयति च यदनेन धनेन तस्य भाग्यपरिवर्तनं भविष्यति। आजीवनं स सपरिवारः सुखी भविष्यति, किन्तु तस्यानेन कृत्येन दण्डिस्वामिनः स्वरूपं लाञ्छितं भविष्यति। स्वधर्माच्च्युतः स पातकी भविष्यति। कृत्रिमक्रोधेन रामानन्दो गिरिधारिलालाय कथयति- "मायामोहादीन् व्यक्त्वा मया एष संन्यासिवेशो धृतः, कृपया भवान् मां पुनस्तस्मिन्नेव अन्धकूपे मा क्षिपतु। एतद् धनं भवतां कोष एव शोभते, अत इतः शीघ्रमपसारयतु भवान्।" दुःखेन श्रेष्ठी तद् धनं नयति।

सत्सङ्गकार्यक्रमस्तथैव सुचारुरूपेण चलति। अनया घटनया गिरिधारिलालो रामानन्दं प्रति विशेषश्रद्धानतो भवति। नगरान्तरादपि रामानन्दस्य कार्यक्रमार्थमावेदनानि नित्यमेवागच्छन्ति, किन्तु स किमप्युत्तरं न ददाति। कार्तिकशुक्लद्वादश्याः प्रातर्वेला गिरिधारिलालस्य जीवने विपन्निशा अस्ति। स अर्द्धमूर्च्छित इव पश्यति, यत् रामानन्दो दण्डिस्वामिनो वेशं व्यक्त्वा सामान्यजन इव स्थितः स्वाभिनयस्य पारितोषिकरूपेण धनं याचते।

गिरिधारिलालः- (सक्रोधम्) दुष्ट! प्रतारक! वञ्चक! इतो गच्छ। त्वया मम धर्मभावनाया उपहासः कृतः। यदाहं तुभ्यं लक्षाधिकं धनं दातुमुद्यत आसम्, तदा त्वया कथं न गृहीतम्?

रामानन्दः- (करबद्धस्तस्य चरणौ स्पृष्ट्वा) यदि तथाऽहमकरिष्यं, तर्हि मम दण्डिस्वामिरूपस्य अपमानो मम व्यवसायस्य च निन्दा अभविष्यताम्। मया स्वाभिनये

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कापि त्रुटिर्न कृता। भवतापि शुद्धहृदयेन धर्मकार्यं कृतम्। अत ईश्वरो भवद्भ्योऽस्य फलमवश्यमेव दास्यति। इदानीं भवान् कृपया मह्यं पुरस्कारं ददातु।

गिरिधारिलालस्तस्मै पञ्चशतरूप्यकाणि दत्त्वा स्वान्तर्गृहं प्रविशति। रामानन्दः प्रसन्नो भूत्वा स्वगृहं गच्छति।

- आचार्यो डॉ. केशवराम शर्मा
बी-59, वीथिसङ्ख्या-3, इन्दिरानिकेतनम्
(उत्तरी छज्जूपुरम्), दिल्ली-110094

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आदिकाव्यरामायणम्

(१)

रामायणरचयितारं वाल्मीकिं नमाम्यहम्।
यस्य नायकोऽस्ति रामचन्द्रो दशरथाऽऽत्मजः।।1।।

(२)

रामायणमादिकाव्यं तस्य च वाल्मीकिः कविः।
विद्वद्भिर्येऽत्र संसारे, आदिकविर्हि कथ्यते।।2।।

(३)

वल्मीकाज्जातो वाल्मीकिः संलग्नोऽत्र तपस्यया।
गतस्य नद्यां स्नानार्थं तस्याऽभूद् वाच उद्गमः।।3।।

(४)

मा निषाद प्रतिष्ठा त्वमगमः शाश्वतीः समाः।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।4।।

(५)

तेन लिखितुमारब्धं तस्माद्दिनाद्रामायणम्।
अस्मात्काव्यात्पूर्वं लोके न केनापि काव्यं कृतम्।।5।।

(६)

लिखितं राममुद्दिश्य काव्यमुक्तं रामायणम्।
रामस्याऽयनं यस्याऽर्थो यत्र रामगतिविधिः।।6।।

(७)

आदौ वनं गतो रामः सीतालक्ष्मणाभ्यां सह।
काञ्चनमृगहननं वैदेहीहरणं ततः ।।7।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(८)

जटायुमरणञ्चाऽग्रे सुग्रीवस्य च मेलनम् ।
हनुमता लङ्कादाहः समुद्रतरणं तथा ।।8।।

(९)

रावणमारणं सीता-वह्निपरीक्षणं ततः ।
प्रस्थानं राजतिलकं रामो राजा बभूव हि।।9।।

(१०)

रामकिशोरमिश्रेण शूकरक्षेत्रवासिना ।
जनबोधाय रचितमादिकाव्यरामायणम्।।10।।

- 0000 -

- डॉ. आचार्य रामकिशोर मिश्रः
295/14 पट्टीरामपुरम्, खेकड़ा
(बागवत) उ०प्र०

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

ज्येष्ठभ्राता (कथा)

गोपिकाऽऽसीद् विधवा,तत्पुत्रोगिरिधरः। बाल्य एव तत्पितुच्छत्रं लुप्तम्। गोपिका वैधव्यदुःखं विस्मृत्य स्वतनयस्य पालने व्यग्रा बभूव। यदा स शालागमनयोग्यो जात स्तदा महता यत्नेन स पाठशालां प्रवेशितः। पाठशाला गृहतो दूरस्थिता, पथि चासीद् आम्रवनम्। गिरिधर आदौ पाठशालां गंतुं नेयेष। तदा मात्रा यथाकथं तस्य संज्ञानं कृत्वा तं प्रेरितवती। किन्तु तेन 'त्वमपि मया सहागच्छ' इति हठः कृतः। निरुपायतः सा वस्त्रभांडाप्रक्षालनं कृत्वा श्रममूल्यं लेभे, तेनैव भरणपोषणं शक्यसम्भवं भवति स्म।

सा हरिभक्ताऽऽसीत् नित्यं मनःपूर्वकं प्रभुध्यानं, तन्नामस्मरणं च कृत्वा पुत्रहितं कांक्षते स्म।

तद्दिने तस्मिन् गिरिधरो नित्यवद् हठं कुर्वन्नास, चिन्तापरा गोपिका भगवंतं स्मृत्वोवाच-''रे डिम्भ! किमित्येवं हठं कुरुषे? अन्ये ते सहाध्यायिनः पाठशालां गच्छन्ति, तैः सह गच्छ!''

सोऽवदत्, ''अम्ब! पथि वर्तते आम्रवनम्, तत्राहं बिभेमि।'' भवतु नाम, साऽभणत् -'तस्मिन्नेव वने तव ज्येष्ठभ्राता वसति, तद् यदा ते भयं भवेत् तमाकारय, सोऽवश्यं ते भयमपहरेत्। गच्छ!''

गिरिधरः श्रुत्वेदं शीघ्रं पाठशालां गन्तुं सिध्दः। ज्येष्ठबंधोर्मीलनाय स समुत्सुकोऽभवत्।

गृहात् प्रस्थाय यदा स आम्रवनं प्राप्तस्तदा तेन 'भो ज्येष्ठबंधो! तात! एष ते कनीयान् भ्राता त्वामाह्वयति! एहि रे बंधो! ''इति स आहूतः! तदा यथा मात्रा वर्णितस्तथा मयूरपिच्छभूषितो, वंशीधरो, नीलवर्णो भ्राता तत्पुरत उपस्थितो वंशीवादयन्।

''रे बंधो! किमिति बिभेषि? न कदापि भेतव्यम्!'' इति तेन भणितम्! अहा! मुरलीरव इव तद्ध्वनिर्मधुरोऽवर्तत। एवं ज्येष्ठभ्रातृमेलनाद् गिरिधरस्तुतोष। नित्यं क्रम एष चलितः। गिरिधरस्याह्वानं श्रुत्वा ज्येष्ठो भ्राता नित्यं तं तत्रागम्य तं धैर्यं ददाति स्म!

''भो अग्रज! अद्याहं पाथेयं नानीतवान्, तद्देहि मे किमप्यत्तुम्।'' गिरिधर उवाच! 'भवतु, तिष्ठ, अहं ते फलानि ददामि।'' इत्युक्त्वा वनांतभागं गत्वा फलानि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

दुग्धं चानीय तस्मै प्रददौ। तानि फलानि सुधामधुराण्यासन्। 'बंधो! भक्षय, शीघ्रं पाठशालां गच्छ, विलंबं मा कुरु। विद्यामर्जय, विद्यावान् भव मातृदेवो भव।'' अग्रजेनोक्तम्।

पाठशालायां कार्यक्रम आयोजितः। प्रधानाध्यापकेन छात्रान् संबोध्यभाषणं कृतम्। सर्वैश्छात्रैरेतदर्थं साहाय्यं कर्तुमाह्वानं कृतम्। सर्वैरपि यथाशक्ति सहयोगः प्रदेय, इति कथितम्। तदनुसारं छात्रैः धान्यगुड-धन-प्रभृति प्रदाय सहकार्यं कृतम्।

अध्यापकेन गिरिधरोऽपि यच्छक्यं तद्देयमिति कथितः 'श्वो मातुराज्ञया यच्छक्यं भवेत् तद्यच्छामीति' गिरिधर उवाच।

गृहमागत्य सा वार्ता कथिता, 'देहि किमपि, यदहं दातुं क्षमो भवेयम् इति माता प्रार्थिता। गृहे दानयोग्यं नाभवत् किमपि, तदा साऽब्रवीत्- ''अत्र वस्तुनि तवाग्रजः प्रार्थनीयः, सोऽवश्यं ते स्पृहा पूरयिष्यति।''

'' ओः! स मयाऽवश्यं विज्ञाप्यः। तं प्रार्थये।'' इत्युक्त्वा वनं गत्वा दधिपूर्णं दधि भाण्डं गृहीत्वा निवृत्तः। 'वत्स, गृहाणैतत्। शिक्षकाय प्रयच्छ।'' इतिसोऽवदत्। लघुभाण्डं वीक्ष्य सर्वैर्हसितम्। गिरिधरोऽवदत्' गुरुदेव! भाण्डं रिक्तं देयम्।'' शिक्षकस्तद्भांडस्थितं दधि बृहत्पात्रे विरिच्य पुनः पुनः पश्यति तद्दधिभाण्डं पूरितमेव तेन दृष्टम्। बृहत्पात्रं दध्ना पूरितम् परं लघुभाण्डं पूर्ववद् दधिपूर्णमभवत्।

चकितचकितः शिक्षकोऽपृच्छत् ' वत्स! केनेदं दधिभाण्डं दत्तम्?

''ममाग्रजेन प्रदत्तम्। गिरिधरो बभाषे।

'अहं तं द्रष्टुं समुत्सुकोऽस्मि, एहि गच्छावः''। शिक्षक उक्तवान्। आम्। चलतु मया सह।' इत्युक्त्वा स शिक्षकद्वितीयो वनं प्रति प्रत्तस्थे। वनं प्राप्य गिरिधरो नित्यवत् ज्येष्ठबंधुमाजुहाव-

'' ज्येष्ठ बंधो! एहि, मम गुरुस्त्वां द्रष्टुकामोऽत्रागतः, शीघ्रमागच्छ।'' परं स नागतः, वारंवारमाकारितेऽपि स नायातः, तदा रुदन्निव स पुनः पुनः प्रार्थितवान्। तदा बृक्षान्तरितः स उवाच-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

''ते माता मम भक्ता, तस्याः प्रार्थनयाऽहं तं संगतं कृतवान्। एष ते शिक्षको न मे भक्तः, अतो न मे दर्शनमर्हति, यातु स वराकः''

तदा शिक्षको दण्डवत् प्रणम्योवाच-'प्रभो! देहि मे दर्शनं कृपातः, नो चेत् प्राणांस्त्यक्ष्याम्यहम्।''

सोऽवदत्-'' एकवारं पणेन दर्शनं वितरामि, न त्वया प्रसंगोऽयं कस्मै अपि वाच्यः, सर्वमत्रैव विस्मर्तव्यम्। एवं ते स्वीकृतिश्चेत् दर्शनं ददामि।''

'' प्रभो, यथाज्ञापयति भवान्।'' शिक्षकेणैवमुक्ते प्रभुणा दर्शनं प्रदत्तम्। अनन्तरं प्रभुरन्तर्हितः।

'अहं भक्तपराधीनः इति भागवतपुराणे भगवद्वचनं परमं सत्यम्।

- **सिद्धेश्वर शर्मा (बलराममहाराजात्मजः)**
श्रीनाथमंदिरम्-उमरगानिवासी,धाराशिवजानपदे
महाराष्ट्र राज्ये-डाकसंकेतः 413606

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारती

भारताभामयी संस्कृतेर्भास्वती
भारतीयोत्तमा सभ्यता शाश्वती।
ज्ञानविज्ञानमूला च या वैदिकी
भारतेऽसौ सदा शोभतां भारती।।1।।

मानवाचारनीतीतिहासाश्रया
वेदवेदाङ्गशास्त्रात्मिका निर्झरी।
ब्रह्मणो मार्गसंदर्शिका पावनी
भारतेऽसौ सदा शोभतां भारती।।2।।

ब्रह्मशास्त्राधृतं तात्त्विकं वाङ्मयं
बोधयन्ती स्थिता पुण्यभूमावियम्।
तत्त्वमारण्यकानाञ्च या पावनं
भारतेऽसौ सदा शोभतां भारती।।3।।

ऋग्यजुस्सामवेदानथर्वादिमान्
ज्ञापयन्ती सुशिक्षां प्रदत्ते च या ।
मानुषी ज्ञानविज्ञानसारस्वती
भारतेऽसौ सदा शोभतां भारती।।4।।

वेदशास्त्रं पुराणं बृहद्वाङ्मयं
काव्यशास्त्रं प्रसिद्धं जगद्दर्शनम्।
चापि शून्यं पुराविष्करोज्ज्योतिषीं
भारतेऽसौ सदा शोभतां भारती।।5।।

पञ्चतन्त्रोपदेशात्मिका भूतले
ज्ञानगङ्गासुधावाहिका मङ्गला।
भारतं पोषयन्ती च विद्योतते
भारतेऽसौ सदा शोभतां भारती।।6।।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विश्वबन्धुत्वभावस्य संरक्षिका।
राष्ट्रवादात्मिका ज्ञानविस्तारिका।
राष्ट्रियैक्यस्य या हेतुभूताऽमृता
भारतेऽसौ सदा शोभतां भारती।।7।।

संस्कृतेः सभ्यतायाश्च सम्पोषिका
धर्मनिरपेक्षभावस्य सञ्चारिका।
राष्ट्रभाषोन्नतेर्मूलभूता च या
भारतेऽसौ सदा शोभतां भारती।।8।।

विश्वभाषाग्रगण्या च या भूषिता
देवभूमावियं सादरं वन्दिता।
यां विनाऽतो न राष्ट्रस्य नो गौरवं
भारतेऽसौ सदा शोभतां भारती।।9।।

शाश्वतीयं सुबोधा प्रदीप्ताऽजरा
मातृभाषा च विद्वद्हृदा ज्ञानदा।
सेव्यतां भारतीयैरतः सन्ततं
भारतेऽसौ सदा शोभतां भारती।।10।।

- हेमन्तकुमारजोशी 'शिवः'
ग्रामः पत्रालयश्च- तल्ली पोखरी
ओखलकाण्डा, नैनीतालः, उत्तराखण्डम्
मो. 09410779784
Email-joshihemant84@gmail.com

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

RNI No.
DELSAN/2013/50379

दिल्ली संस्कृत अकादमी, दिल्ली सर्वकारः

प्लॉट सं॰-५, झण्डेवालानम्, करोलबागम्,
नव देहली-११०००५

ईमेल- delhisanskritacademy@gmail.com
वेबसाइट- www.delhisanskritacademy.delhi.gov.in

CC-0. Nepal Sanskrit Academy. Kathmandu Collection